2016

M. A.

Part-II Examination

SANSKRIT

Paper – V

*Full Marks* : 100

*Time* : 4 Hours

*The figures in the right-hand margin indicate full marks.*

*Candidates are required to give their answers in their own words as far as practicable.*

First Half [Marks–60]

1. यथेच्छमेकः प्रश्नः समाधेयः — 10

a) ब्रह्मणः सृष्ट्यपेक्षया कविसृष्टिः कथम् उत्कृष्टा-मम्मटानुसारं व्याख्यायताम्।

b) मम्मटमते काव्यं कतिविधम्? कानि च तानि? तेषां स्वरूपं सोदाहरणं प्रतिपाद्यताम्।

c) सप्रसङ्गं व्याख्यायताम् —

i) सद्यः परनिर्वृतये।

(Turn Over)

ii) इति हेतुस्तदुद्भवे।

2. यथेच्छमेकः प्रश्नः समाधेयः — 10

a) मम्मटनये शब्दानां केऽर्थाः? तत्र तात्पर्यार्थविषये मम्मटमतिः आलोच्यताम्।

b) लक्षणालक्षणमुल्लिख्य तद्भेदाः सोदाहरणम् आलोच्यन्ताम्।

c) सप्रसङ्गं व्याख्यायताम् —

i) सर्वेषां प्रायशोऽर्थानां व्यञ्जकत्वमपीष्यते।

ii) नाभिधा समयाभावात्।

3. यथाभिमतं प्रश्नद्वयं समाधेयम् — 10×2

a) को नाम अनुप्रासः? तस्य कति भेदाः मम्मेटन स्वीकृताः?- सोदाहरणमालोच्यताम्।

b) सलक्षणं सोदाहरणं द्वयं व्याख्येयम् —

वक्रोक्तिः, अनन्वयः उत्प्रेक्षा, दीपकम्।

c) सयुक्तिकं सलक्षणमलङ्कारनिर्णयः क्रियताम् —

i) सर्वस्वं हर सर्वस्य त्वं भवच्छेदतत्परः।
नयोपकारसाम्मुख्यमायासि तनुवर्तनम् ॥

ii) देवीभावं गमिता परिवारपदं कथं भजत्वेषा ।
न खलु परिभोगयोग्यं दैवतरूपाङ्कितं रत्नम्॥

d) पार्थक्यं निरूपयत —

i) उपमारूपकयोः।





ii) निदर्शनासमासोक्त्योः।

4. 'भाक्तमाहुस्तमन्ये'—इति कस्मिन् प्रसङ्गे उक्तः? अस्या आशयः ध्वन्यालोकानुसारं स्पष्टीक्रियताम्। 14

अथवा

आनन्दवर्धनानुसारं ध्वनेः स्वरूपं प्रतिपाद्यताम्।

5. सप्रसङ्गं व्याख्यायताम् — 6

योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः ।
वाच्यप्रतीयमानाख्यौ तस्य भेदाभुवौ स्मृतौ ।

अथवा

आलोकार्थी यथा दीपशिखायां यत्नवान् जनः ।
तदुपायतया तद्वदर्थे वाच्ये तदादृतः ॥

## Second Half [Marks–40]

1. भरतमतानुसारं नाट्योत्पत्तिविषये सारगर्भो निबन्ध एको विरचनीयः। 14

अथवा

भट्टलोल्लटस्योत्पत्तिवादं निरूपयत ।

2. a) अधोलिखितेषु कस्यचिदेकस्य व्याख्या कार्या — 6

i) ग्रहणे धारणे ज्ञाने प्रयोग चास्य सत्तम ।
अशक्ता भगवन् देवा न योग्या नाट्यकर्मसु ॥

ii) भारतीं सात्त्वतीं चैव वृत्तिमारभटीं तथा ।

समाश्रितः प्रयोगस्तु प्रयुक्तो वै मया द्विजाः॥

iii) नानाभावोपसंपन्नं नानावस्थान्तरात्मकम् ।

लोकवृत्तानुकरणं नाट्यमेतन्मया कृतम् ॥

b) अधोलिखितेषु यथेच्छं <u>द्वितयस्य</u> टीका लेख्या – 3+3

नान्दी, सात्त्विकभावः, संग्रहः, हास्यरसः ।

3. किं नाम वस्तु? कतिविधं च तत्? धनञ्जयमतानुसारं तत्स्वरूपं व्याख्यायताम्। 14

अथवा

व्याख्यायताम् -

अन्यद्भावाश्रयं नृत्यं नृत्तं ताललयाश्रयम् ।

4. अधोलिखितेषु यथेच्छं <u>द्वितयस्य</u> टीका लेख्या – 3+3

बीजम्, विष्कम्भकः, मुखसन्धिः, जनान्तिकम्, पताका ।

—o—